## MASTER OF ARTS EXAMINATION, 2025

**( 1st Year, 1st Semester )**

**SANSKRIT**

**COURSE : III**

**[ Sanskrit Grammar (A)]**

*Time* : *Two Hours* | *Full Marks* : 30

*The figures in the margin indicate full marks.*

**सर्वे प्रश्नाःसंस्कृतभाषया देवनागरीलिप्या च समाधेयाः –**

१. अधोलिखितानां सूत्राणां **द्वयं** सोदाहरणं व्याख्येयम्। तत्र संज्ञातः **एकस्य** परिभाषातश्च **एकस्य** समाधानं कार्यम्। 5×2=10

(क) भूवादयो धातवः।

(ख) तपरस्तत्कालस्य।

(ग) स्थानेऽन्तरतमः।

(घ) अलोऽन्त्यस्य।

२. अधोलिखितेषु **द्वयं** विशदनीयम्- 4×2=8

(क) तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा। त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्।

(ख) तेन दधीत्यस्य हरति शीतलं षष्ठं सान्द्रमित्येतेषु परेषु यणादिकं न।

(ग) परस्य यद्विहितं तत्तस्यादेर्बोध्यम्। 'अलोऽन्त्यस्य' इत्यस्यापवादः।

(घ) 'अष्टाभ्य औश्' इत्यादौ 'आदेः परस्य' इत्येतदपि परत्वादनेन बाध्यते।

**( अथवा )**

निम्नलिखितेषु **द्वयं** निरूपणीयम्-

संयोगः, गुणः, सवर्णम्, पदम्।

३. अधोलिखितेषु **चत्वारः** प्रश्नाः समाधेयाः- 3×4=12

(क) आभ्यन्तरप्रयत्नः कतिविधः? नामत उल्लिख्यन्ताम्।

(ख) खर्-प्रत्याहारस्थितानां वर्णानां के तावद् ब्राह्यप्रयत्नाः?

(ग) 'वृद्धिरादैच्' इति सूत्रे च-कारस्य 'चोः कुः' इति कुत्वं कथं न भवति?

(घ) 'त्यदादीनामः' इत्यत्र कस्याः परिभाषाया उपयोगो भवति?





(ङ) 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' इति सूत्रे काल-पदग्रहणं किमर्थम्? वर्णसमाम्नाये अ-कारस्य आदौ निर्देशसत्त्वेऽपि सूत्रकारेण आकाल इति नोक्त्वा ऊकाल इति कथमुक्तः?

(च) अनेकविधेष्वान्तर्येषु स्थानत आन्तर्यस्य बलीयस्त्वं सोदाहरणं व्याख्यायताम्।

★★★